# Chandi Stuti

# ચણ્ડીસ્તુતિઃ

## Document Information

Text title : Chandi Stuti

File name : chaNDIstutiH.itx

Category : devii, devI, stuti

Location : doc_devii

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shyAmArahasyam | trayodashaH parichChedaH ||

Latest update : March 19, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 19, 2025

*sanskritdocuments.org*

# ચણ્ડીસ્તુતિઃ

(શ્યામારહસ્યે)
અથ સ્તુતિઃ તદુક્તં કુલચૂડામણૌ ।
ભૈરવ ઉવાચ ।
મચ્ચિત્તે ચર ચણ્ડિ ! ચૂર્ણિતદુરાચારપ્રચણ્ડાસવે
સ્વૈરં દારય ભૂવિ દુર્ધરદવદ્રોહોર્મિમર્માસ્પદઃ ।
તેનાયં નિરુપદ્રુતો નિરુપમશ્રીપાદપદ્માટવી-
પ્રાન્તાનન્તવશાન્તરે મમ મનોહંસશ્ચિરં નન્દતુ ॥ ૧॥

હિત્વા ચણ્ડિ ! હિરણ્યદારણપટુપ્રોદ્દામદન્તાઙ્ગુલિઃ
સ્ફાલત્કલ્પસુમેરુસાદરસટાટોપં નૃસિંહં સુરાઃ ।
માતસ્તત્પશુપાશપેશલપટુશ્રીપાદ સંસેવિનં
સેવન્તે કરિવૈરિણં કિમરિભિર્ભીતિર્ભવત્સેવિનામ્ ॥ ૨॥

ચણ્ડિ ! ત્વદ્વિષયાન્તરક્ષણપદં શ્રોત્રાન્તરં ચોદ્ધૃતં
તત્તત્ત્વં પુરુષપ્રકૃત્યનુગતં બ્રહ્માદિભિર્ગીયતે ।
તસ્માદ્દેવિ ! સમસ્તદૈવત સુધાસારૈકધામસ્ફુરત્
શ્રીમત્પાદસરોજચુમ્બનપરં મામદ્ય સમ્ભાવય ॥ ૩॥

મન્નિદ્રા યદિ વાસ્તુ તત્કુલપથાચારાદ્વરં માસ્તુ વા
કીર્ત્તિઃ કેશવકૌશિકાર્ચનકરી નૈવાસ્તુ સત્સન્નિધિઃ ।
માતર્બ્રહ્મહરિસ્મરારિહુતભુગ્દૈત્યારિસેવાપદ-
શ્રીમત્પાદસરોજચિન્તનવિધૌ ચિત્તં સદૈવાસ્તુ નઃ ॥ ૪॥

નિર્દિષ્ટોઽસ્મિ યદિ ત્વદીયપદયુક્પૂર્વાપરીભાવને
નિર્દિષ્ટસ્ય તદા મમાપિ વિરલં કિંવાસ્તુ સિદ્ધાસ્પદમ્ ।
તસ્માદ્દેવિ ! કૃપાભવાઞ્છિતભવં શ્રીપાદપદ્મદ્વયં
મચ્ચિત્તે ક્ષતસમ્પદિ પ્રસરતુ ક્ષેમઙ્કરિ ! ક્ષમ્યતામ્ ॥ ૫॥

સ્વાત્માનં પરિરભ્ય ભૂતપતિરમ્યુન્માદમાસાદિતઃ

સ્વૈરં જીવનરક્ષણે સ ચ કૃતૌ નૈવાભવિષ્યત્ પ્રભુઃ ।
દૈવાદ્વિચ્યુતચન્દ્રચન્દનવનપ્રાગલ્ભગર્ભસ્રવ-
ન્માધ્વીપૂર્ણભવત્પદૈકકમલામોદેન નાસ્વાદિતઃ ॥ ૬॥

હા હા માતરનાદિમોહજલધિવ્યાહારસિદ્ધાખિલ-
બ્રહ્માનન્દરસાભિષેકનિરસસ્વાન્તોદરૈર્માદૃશઃ ।
અસ્માકં સુરવન્દનિર્ભરમનસ્તાપાભિભૂતિક્ષમ-
શ્રીમદ્ભક્તિરસાતિદુર્દિનપરીણાહઃ સદા સર્પતુ ॥ ૭॥

યત્પાદસ્ફુરદંશજાલજઠરાચણ્ડાંશકોટિખલત્-
સ્વાન્તધ્વાન્તવિસારિનિર્મલચિદાનન્દત્રયં દૈવતમ્ ।
સ્વર્ગં સંસૃજતે સ્થિતિં વિતનુતે સૃષ્ટિં પુનર્લુમ્પતે
પ્રોદ્ભિન્નાઞ્જનનીલનીરજમહચ્ચિત્તે તદેવાસ્તુ નઃ ॥ ૮॥

યા શશ્વન્મહિષચ્છલસ્ફુરમિલદ્વર્ભાદ્વિધારસ્ફર-
દ્ભક્તાન્તઃ પ્રસરત્તમસ્તમશિરો દૈત્યં સમાલમ્બતે ।
સા દુર્ગા ભયદુર્ગદુર્ગતિહરા લમ્બાન્તરત્રાસિની
દૃપ્યદ્દૈવતવૈરિમારણપટુર્જીયાજ્જયાહ્લાદિની ॥ ૯॥

નૃત્યત્ખેટકચામરાઞ્જનચરચ્ચક્રાધખડ્ગાવર-
સ્ફાયચ્છૈલશિલીમુખોચ્છલદનપાજિચ્યુતાસ્ત્રાયુધૌ ।
વાઞ્છાવાત-વિસર્પિનાર્ત્તિતશિરઃસાટોપદુષ્ટાસુર-
વુટ્યત્ખણ્ડવિખણ્ડિતાખિલશકુન્તક્ષુત્પિપાસાકુલૈઃ ॥ ૧૦॥

કાઞ્ચીકલ્પવિરામકાલકલિતાં તૌવ્રોરુસમ્પાદકો-
ન્માદ્યન્માહિષતિર્યગાયતશિરઃશ◌ૃઙ્ગાન્તરાલસ્થલે ।
વર્ણૈર્વર્ણસુપત્રમધ્યકલિતે રક્ષાશ્રુતૌ માતૃભિઃ
સેવ્યે ચારુવરાઙ્ગને રણમુદા ચૂર્ણાયમાનાં સ્મરેત્ ॥ ૧૧॥

ઊર્દ્ધ્વાધઃક્રમસવ્યવામકરયોશ્ચક્રં દરં કર્ત્તૃકા
ખેટં વાણધનુસ્ત્રિશૂલભયકૃન્મુદ્રાં દધાનાં શિવામ્ ।
શ્યામાં નીલઘનોચ્ચકુન્તલચયપ્રોન્નદ્ધજૂટાસ્ફલ-
દ્વીરાસ્ફાલલસત્કરાલવદનાં ઘોરાટ્ટહાસોદ્ભટીમ્ ॥ ૧૨॥

એવં યે ભવદેવિ ! મૂર્ત્તિમનઘાં ધ્યાયન્તિ દુર્ગાદિભિઃ
શક્રાદ્યૈરપિ પૂજિતાં પરપુરક્ષોભાદિકં કુર્વતે ।
રાજ્યં શત્રુજયઃ સદર્થધિષણા કાવ્યામૃતં દેશિકઃ

સ્તમ્ભોચ્ચાટનમારણાદિકૃતિનાં તેષાં સ્વયં જાયતે ॥ ૧૩॥

સ્તોત્રં તે ચરણારવિન્દયુગલધ્યાનાવધાનાન્મયા
મન્ત્રોધ્ધારકુલોપચારરચિતં ગુપ્તોપદ્વેષ્ટા યદિ ।
યે શ ૃણ્વન્તિ પઠન્તિ દેવિ । સહસા શ્રીમોક્ષકામાદય-
સ્તેષાં હસ્તગતા ભવન્તિ જગતાં માતર્નમસ્તે જયઃ ।

ઇતિ શ્યામારહસ્યે કુલચૂડામણ્યુક્તં ચણ્ડીસ્તુતિઃ સમ્પૂર્ણા ।

- ॥ શ્યામારહસ્યમ્ । ત્રયોદશઃ પરિચ્છેદઃ ॥

- .. shyAmArahasyam . trayodashaH parichChedaH ..

Encoded and proofread by Ruma Dewan

*Chandi Stuti*

pdf was typeset on March 19, 2025

Please send corrections to *sanskrit@cheerful.com*